This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीमहालसापांडुरंगायनमः॥
प्रणम्येशपदांभोजंमहादेवेनतत्त्वतः॥ईशासाधारणात्मत्वजातौयु
क्तिर्निबध्यते॥१॥ननुकथंजीवेश्वरसाधारणात्मत्वजातिसिद्धिः॥न
चजीवात्मनिसिद्धायाआत्मत्वजातेःश्रौतात्मव्यवहारबलेनेश्वरेसं
बंधकल्पनात्तस्याएवलाघवेनात्मपदशक्यतावच्छेदकत्वकल्पना
च्चेश्वरात्मसाधारणात्मत्वजातिसिद्धिरितिवाच्यं।प्रमाणाभावेनजीवा
त्मन्येवतस्याअसिद्धेः।अथज्ञानादिविशेषगुणसमवायीकारणताव
च्छेदकतयातत्सिद्धिःसावकार्यस्यसमवायिकारणत्वनियमादि

Acc. No. 302. M 821
Title - आत्मत्वजातिविचार
Sub. - न्याय.
Auther - ~~माहादेव~~ महादेव
Date -
Folios - 33.

9

Checked 2012

K.K.S.U. LIBRARY
RAMTEK
441 106
M-821
Dist Nagpur

प्र२

वे: त्तिचेन्न।तादृशानियमासिद्धेः सिद्धौवाजन्यसत्त्वावच्छिन्नंप्रतिद्रव्यत्वे
नत्कुं[illegible]यासामान्यसमवायिकारणतयैवोपपत्तेः।नचज्ञानजनकत्वा
वच्छेदकत्तयात्मत्वजातिसिद्धिः अन्यथाघटादावपिसमवायेनज्ञाना
पत्तेरितिवाच्यं।सुषुप्तिकालावच्छेदेनज्ञानोत्पत्तिवारणायात्ममनोयो
गस्यविजातीयत्वेसामानाधिकारण्यप्रत्यासत्त्याअवश्यंहेतुतयात्म
भिन्नेसमवायेनज्ञानानुत्पादात्।नचतादृशविजातीयसंयोगस्यम ॥२॥
नस्यपिसत्त्वेनतत्रज्ञानापत्त्याआत्मत्वेनहेतुत्वमावश्यकमितिवा
च्यं।विजातीयसंयोगसंबंधेनमनस्त्वेनैवहेतुत्वात्।नचमनसिता

दृशसंयोगेनमनोस्तिमनोमनःसंयुक्तमित्यप्रतीतेः।नचविजातीयसं
योगेनमनस्त्वेनहेतुतासमवायेनविजातीयसंयोगस्यैवेतिनिगमना
विरहइतिवाच्यं।विजातीयसंयोगस्यसमवायेनात्मनस्तादात्म्येनहेतु
त्वापेक्षयाविजातीयसंयोगेनमनोहेतुतायांलाघवात्।एतेनविजाती
यसंयोगेनमनस्त्वेनैकहेतुताआत्मत्वेनवेत्तिनिगमनाविरहोपिप्र वि
त्युक्तः।विजातीयसंयोगेनतादात्म्येनचाआत्मत्वेनहेतुत्वद्वयापेक्ष
याविजातीयसंयोगेनमनस्त्वेनैकहेतुतायांलाघवात्।उक्तरीत्या[illegible]
विजातीयसंयोगेनआत्मनःआत्मन्यभावेनतत्रापिज्ञानानुत्पादा

2

१०८ आहत [illegible]

॥१२॥

पत्तेश्चनचेछाद्वेषयोरात्मभिन्नेउत्पत्तिवारणायतज्जनकतावछेदकत
यात्मत्वजातिसिद्धिरितिवाच्यं।इच्छांप्रतिज्ञानस्यकृतिंप्रतिइच्छादीनां
१३ हेतुत्वस्यक्लृ[illegible]त्वेनानतिप्रसंगात्।नचसुखदुःखयोरन्यत्रापत्तिभि
यातज्जनकतावछेदकतयात्तत्सिद्धिरितिवाच्यं।सुखदुःखेप्रतिधर्मा
धर्मयोर्हेतुत्वस्यक्लृ[illegible]त्वेनैवोपपत्तेः।एतेनभावनाख्यसंस्कारादृष्ट
जनकतावछेदकतयात्तत्सिद्धिरितिपरास्तं।भावनाख्यसंस्कारंप्रति
पूर्वानुभवस्यादृष्टंप्रतिमिथ्याज्ञानवासनायाश्चहेतुत्वस्यक्लृप्तत्वेना
न्यत्रतद्विरहादेवानुत्पत्तेः।एवंद्वेषकारणतावछेदकतयापिनतत्सिद्धिः

फलद्वेषस्यदुःखत्वादिज्ञानजन्यत्वेनोपायद्वेषस्याचानिष्टसाधनताज्ञा
नजन्यत्वेनतद्विरहादेवान्यत्रद्वेषानुत्पादादित्यात्मत्वजातौमानाभावइति
।अत्रकेचित्।सुखजनकतावच्छेदकतयैवात्मत्वसिद्धिरिति।सुखत्वाव
च्छिन्नंप्रतिधर्मत्वेनहेतुत्वस्याक्लृप्तत्वात्।एतदनुरोधेनतत्कल्पनेचता
दात्म्येनात्मत्वेनजनकत्वमेवोचितंसमवायेनजनकत्वापेक्षयातादा
त्म्येनजनकतायांलाघवात्।लाघवंचतादात्म्येनजनकताघटकव्याप ।।२।
कतायांप्रतियोगिवैयधिकरण्याघनिवेशेन।।नचात्मत्वावच्छिन्नेसुख
स्यकादाचित्कत्वानुरोधेनधर्मत्वेनजनकत्वमावश्यकमितिवाच्यं।

तत्तत्कर्मजन्यतावच्छेदकतयासिद्धतत्तद्वैजासांतर्भावेनावश्यकल्प
नीयेनतत्तद्विजातीयसुखत्वावच्छिन्नंप्रतिविजातीयादृष्टंहेतुःस्वज
न्यादृष्टवत्त्वसंबंधेनाश्वमेधादिकंवाहेतुरितिकार्यकारणभावेनैव
कादाचित्कत्वनिर्वाहात्।नचैवं[illegible]मितादृशकारणाभावादेवघटादौसु व
खानुत्पादसंभवेसुखत्वावच्छिन्नंप्रतितादात्म्येनात्मत्वेनजनकत्वमा
नाभावादितिवाच्यं।घटादिनिष्ठसुखत्वावच्छिन्नाभावाधिकरणता
यांतादृशकारणाभावकूटाधिकरणत्वस्यप्रयोजकत्वकल्पनापेक्ष
यात्मत्वावच्छिन्नभेदाधिकरणत्वस्यैकस्यप्रयोजकत्वेलाघवेन[illegible]

३॰ तादृशजनकत्वस्यावश्यकत्वादित्याहुस्तदसत्। तथासत्येतादृशरीरत्वात्म
त्वावच्छिन्ननिष्ठनाशकशरीरावच्छिन्नसुखत्वावच्छिन्नाभावाधिकरणता
यांतत्तज्जातीयादृष्टाभावकूटाधिकरणत्वस्यतत्तदश्वमेधत्वावच्छिन्ना
भावकूटाधिकरणत्वस्यचाप्रयोजकत्वकल्पनापेक्षयैकस्यधर्मत्वावच्छि
न्नाभावाधिकरणत्वस्यप्रयोजकत्वेलाघवेन[illegible]
[illegible]सुखत्वावच्छिन्नंप्रतिधर्मत्वेनकार्य ॥४॥
कारणभावस्यावश्यकत्तयातादात्म्येनात्मत्वेनजनकत्वेमानाभावात्।
यत्तु आत्मपदशक्यतावच्छेदकतयाआत्मत्वजातिसिद्धिः। कार्यत्ताव
च्छेदकत्तयाकारणत्तावच्छेदकतयाजातिसिद्धिवदसतिबाधकेशक्य

तावच्छेदकत्तयापिजातिसिद्धेरंगीकारात्। नचैवंविभुपदशक्यताव
च्छेदकतयागगनादिसाधारणतया विभुत्वाख्यजातिसिद्ध्यापत्तिरिति
वाच्यं। गगनाँमीश्वरानतिरिक्तत्वस्यदीधितिकृत्संमतत्तयातस्यात्मत्व
रूपत्वेनेष्टापत्तेरित्याहुः। तदपिन। एवंसति [illegible] हयादिपदेपिसिंह
श्वादिसाधारणजातिसिध्यापत्त्यानार्थोच्छेदप्रसंगात्। नचहरिःसिंहो ना
हरिर्भेकोहरिर्वाजीहरिःकपिरित्यादिनानाप्रवृत्तिनिमित्तबोधककोशा
विरोधात्नसिंहाश्वादिसाधारणजातिसिद्धिरितिवाच्यं। आत्मादेहधृतौ अत्रापि
जीवेस्वभावेपरमात्मनीत्यादिनानाप्रवृत्तिनिमित्तबोधककोशाविरोधेन नजीवेश्व
[illegible] धारणात्मत्वजातिसिद्ध्यभावात्। यदिचकोशा

स्यन्नप्रवृत्तिनिमित्तनिर्णायकत्वंतथासतिगुणेशुक्लादयःपुंसिगुणिलिं
गास्तुतद्वतीत्यादिकोशात्।शुक्लरूपादीनामपिशुक्लपदादिप्रवृत्तिनि
मित्ततापत्तेः।किंतुशक्तिनिरूढलक्षणान्यतरप्रतिपादकत्वंप्रवृत्तिनिमित्त
निर्णयस्तुलाघवादितर्कसहकृतप्रमाणांतरेणैवतथाचकोशविरोधा
भावेनशक्यतावच्छेदकतयाजीवेश्वरसाधारणात्मत्वजातिसिद्धौनबाध
कमितिविभाव्यतेतदाहुर्यादिपदेपितुल्यं।अतएवात्मात्मेत्यनुगता ॥५॥
कारप्रतीतिविषयतावच्छेदकतयात्मत्वजातिसिद्धिरित्यप्यपास्तं।ना
नार्थोच्छेदापत्तेः।अभिनवास्तुशक्यतावच्छेदकतयापिजातिसिद्धिः

ध

परंतुतस्यायमर्थोयज्जातिर्सि[illegible]कप्रकारांतरेणसिद्धस्यैवशक्यताव
च्छेदकत्वंतथाचननानार्थोच्छेदःसिंहाश्वादिसाधारणजातेःप्रकारां
तरेणासिद्धत्वात्।प्रकृतेतुसुखजनकतावच्छेदकत्वेनजीवात्म
निसिद्धस्यात्मत्वाख्यजातिविशेषस्यलाघवेनशक्यतावच्छेदकत्वां
गीकारेणजीवेश्वरसाधारणात्मत्वजातिसिद्धौबाधकाभावात्।नच
तथापिनित्यस्यस्वरूपयोग्यत्वेफलावश्यंभावनियमभंगापत्ति
रितिवाच्यं।अदृष्टरूपसहकार्यंतराभावादेवकार्याभावस्योपप
न्नत्वेनतादृशनियमेमानाभावात्।नचजनकत्वातिप्रसक्तस्यतस्य

वि०।। कथमवच्छेदकत्वमितिवाच्यं।श्रौतासव्यवहारबलादीश्वरेपिजन
कत्तासंबंधेस्यकल्पनीयतया।ऽत्तिप्रसक्तेरभावात्।अत्तएवास्यंता
जनकव्यावृत्तरूपेणकारणत्वेसंभवतितत्साधारणरूपेणकारण
तायाअन्याय्यत्वमितितिनियमस्यानसंगइतिवदंति।तदप्यज्ञानवि
जृंभितं।पूर्वोक्तयादिशासुखजनकत्तावच्छेदकत्तयाजीवात्मन्य
पिआत्मत्वस्यासिध्यात्वस्याजातिसाधकप्रकारांतरासिद्धत्वेन ।।६
त्मपदशक्यत्तावच्छेदकत्वासंभवात्।अपरेतुनष्टएवपूर्वदेशसंयो
गेउत्तरदेशसंयोगोत्पत्याउत्तरदेशसंयोगत्वावच्छिन्नंप्रतिपूर्वदेश
संयोगत्वेनप्रतिबंधकत्वमवश्यंवाच्यंतत्रपूर्वदेशत्वंनोत्तरदेभिन्नत्वे श्र

उत्तरदेशभिन्नजतुपुंरर्ख[illegible]दिरूपपूर्वदेशसंयुक्तस्यैवेषोत्तरसंयोगो देश
दयेनव्यभिचारापत्तेः।नचसमानावच्छेदकत्वस्यप्रत्यासत्तित्वेन्न
दोषइतिवाच्यंस्तिमितवस्त्रादौ[illegible]सत्यपिघृतजलादिसंयोगे
स्तत्लादिसंयोगोदये[illegible]नपृष्टलग्ना।वस्त्रादौसत्सपिशरीरादिसंयो
गेतंतुनांसत्यपिआरंभकसंयोगेआरंभकसंयोगाविरोधिकर्मणि
जलालोकगगनादिसंयोगोदयेनचव्यभिचारत्तादवस्थ्यात्।।नचा
वच्छेदकत्ता[illegible]टित्तसामानाधिकरण्यसंबधेनतत्तत्क्षणावच्छिन्नतत्त
त्क्रियाविरहविशिष्टपूर्वदेशसंयोगएवप्रतिबंधकः स्तिमितवस्त्रा

दौजलादिसंयोगःपृष्ठलग्नवस्त्रादौशरीरादिसंयोगश्चनतत्तत्क्षणा
वच्छिन्नतत्तत्क्रियाविरहविशिष्टइतिनदोषइतिवाच्यं।गौरवात्।
किंत्वात्मत्वमेवपूर्वदेशत्वंतथाचात्मसंयोगत्वेनप्रतिबंधकत्तेति
फलित्तं।एवंचतत्प्रतिबंधकत्तावच्छेदककोटिप्रविष्टत्वेनात्मत्वजा
तिसिद्धिस्तस्याविनिगमनाविरहेणेश्वरसाधारण्यमपि।नचज्ञान
वत्संयोगवत्त्वेनैवतत्प्रतिबंधकत्वमितिवाच्यं।अनंतज्ञानाना
मवच्छेदकत्वेगौरवात्।नचतथाप्यात्मसंयोगस्याप्यात्मसंयोग
त्वेनप्रतिबंधकत्वकल्पनेऽवच्छेदकगौरवादात्मसमवेतत्वसं

योगत्वयोर्विशेष्यविशेषणभावेविनिगमनाविरहाच्चतत्संयो
गनिष्ठजातिविशेषएवप्रतिबंधकतावच्छेदकइतिनात्मत्वजा
तिसिद्धिरितिवाच्यं।ममापिसंयोगसंबंधेनात्मत्वेनैवप्रतिबंधक
त्वकल्पनेयोक्तगौरवानवकाशात्।नचतथापिगगनादिकमा
दायविनिगमनाविरहइतिवाच्यं।गगनत्वादेरुपाधित्तयाआत्म
त्वस्यजातित्तयालाघवस्यैवविनिगमकत्वात्।गगनादीनामी
श्वरानतिरिक्तत्वाच्चेतिपुनर्निर्व्यलीकःपंथाइत्याहुः।तदपिन
समंजसं।तथासतियत्रपटस्यसर्वावच्छेदेनकर्मणासर्वावच्छेदे

वे· नैकएवात्मसंयोगजनितसंयोगाग्रमात्रावच्छेदेनकर्मांतरादात्मवि
भागस्ततः आत्मसंयोगनाशस्ततोग्रावच्छेदेनपरस्योत्तरदेशसं
योगस्तत्राग्रावच्छेदेनसंयोगोत्पत्तिसमये मूलावच्छेदेनवृक्षादिसं
। योगसत्वेपिमूलावच्छेदेनोत्तरदेशसंयोगोत्पत्तिप्रसंगात्।अग्रा
वच्छेदेनोत्तरदेशसंयोगानुरोधेनात्मसंयोगाभावस्यावश्यमभ्यु
पेयत्वात्।वृक्षादिसंयोगस्यचभवद्भिः प्रतिबंधकत्वानंगीकारा ॥७॥
त्।अथोपदर्शितलाघवादात्मसंयोगत्वेनप्रतिबंधकत्वेसिद्धेतत्रा
वच्छेदकै[illegible]देनसंयोगभेदाभ्युपगमान्नदोषः नचानेकसंयोगव्य

क्तिकल्पनयागौरवमितिवाच्यं।फलमुखगौरवस्यादोषत्वादितिचे
न्न।व्यक्तिकल्पनास्थलेफलमुखगौरवस्यापिदोषत्वेनप्रामाणि
कैरंगीकारात्।अन्यथालाघवान्नाशत्वावच्छिन्नंप्रतिसत्वेनहेतुत्व
कल्पनेनपदार्थमात्रस्यैवक्षणिकत्वमंगीकुर्वतांपापिष्ठानांदुर्वा
र्यत्वापत्तेः।तन्मतेऽनंतव्यक्तिकल्पनायाःफलमुखत्वेनगौरवदोष
संपादकत्वयादोषांतरस्यदृढस्याभावेनादुष्टत्वात्।एवंवायुसंयोगा
देः प्रतिबंधकत्वमादायविनिगमनाविरहोपिदुरुद्धरः तस्माद्वृक्षसंयो
गादिसाधारण्येनगुरुरूपेणैवपूर्वदेशसंयोगस्यप्रतिबंधकत्वंन

३० त्वात्मसंयोगत्वेनेतिनैतादृशयुक्त्या आत्मत्वजातिसिद्धिः। अत्रोच्यते। द्रव्य
चाक्षुषादिकंप्रतिचक्षुःसंयोगादिवदात्ममानसंप्रतिसंनिकर्षविध
यात्ममनःसंयोगोविजातीयसंयोगत्वेनहेतुरितिसर्वसिद्धं तत्रकार्य
तावच्छेदक[redacted]कोटिप्रविष्टात्मत्वस्यज्ञानवत्त्वरूपत्वेऽनंतज्ञानानामव
च्छेदकत्वेनेच्छावत्त्वादिकमादायविनिगमनाविरहेणचगौरवमित्यात्म
त्वजातिमभ्युपेत्यात्मत्वावच्छिन्नविषयताशालिमानसत्वमेवमनःसं ॥९
योगकार्यतावच्छेदकंवाच्यं। नचद्रव्यविषयताशालिमानसत्वमेवका
र्यतावच्छेदकमस्त्वितिवाच्यं। घटवद्भूतलमित्याद्यलौकिकमानस

स्यद्रव्यविषयताशालिनोमनःसंयोगशून्यघटादावपिसत्वेनव्यभिचा
रापत्तेः। द्रव्यलौकिकविषयताशालिमानसत्वस्यकार्यतावच्छेदकत्वो
पगमेनोक्तदोषवारणसंभ[redacted]
वेपिमानसनिरूपितलौकिकविषयतायाः प्रकारांतरेणाक्लृप्तत
यातदनुरोधेनविषयभेदभिन्नातिरिक्तलौकिकविषतास्वीकार
मपेक्ष्यात्मत्वावच्छिन्नविषयताशालिमानसत्वंकार्यतावच्छेदक[redacted]
कोटिप्रविष्टतयात्मत्वजातिसिद्धिः। तस्या ईश्वरसाधारण्यमपि[redacted]ईश्व
स्यैवकार्यतावच्छेदकत्वमुचितमितितत्त्व

वि॰ रात्मसाक्षात्कारस्यमुक्तिजनकत्वे तस्यमानसान्यस्यासंभावितत
यातस्यापिसंग्राह्यत्वात्। चैंनेश्वरसाक्षात्कारस्यमुक्तिजनकत्वेए
।। वमानाभावः। वेदाहमेतंपुरुषंमहांतमादित्यवर्णंतमसःपरस्तादि
त्यादिनेश्वरात्मानमुपक्रम्यवृत्तायांतमेवविदित्वा [illegible] मृत्युमेतिना ति
न्यःपंथाविद्यतेऽयनायेतिश्रुतेरेवतत्रमानत्वात्जीवात्मनीरत्तेभि
न्नत्वज्ञानंतुअहंशरीराद्यभिन्नइतिमिथ्याज्ञानजन्यवासनानाश ।।१०
एवोपयुज्यते। विरोधिज्ञानस्यविपरीतसंस्कारनाशकत्तर्याःक्लृप्त
त्वात्। नचमुक्तिहेतुत्वेनावश्यकस्येश्वरज्ञानस्यैवतन्नाशकत्वे

मस्त्वितिवाच्यं। तथासत्यतिरिक्तकार्यकारणभावकल्पनापत्तेः।।
उपदर्शितज्ञानस्यतन्नाशकत्वेघटःशरीरादिभ्योभिन्नइत्या
दिज्ञानस्यघटःशरीराद्यभिन्नइत्यादिसंस्कारनाशकत्वेकल्पनी
येलाघवेनधर्मितावच्छेदकविशेषाननिवेश्यस्वप्रतियोगिसंस्का
रीयशरीरादिनिष्ठप्रकारतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकवि
षयतानिरूपितभेदनिष्ठप्रकारतानिरूपितप्रतियोगित्वीयसांसर्गि
कविषयतानिरूपिताभावनिष्ठप्रकारतानिरूपितविशेषणतावि
शेषीयसांसर्गिकविषयतानिरूपितविशेष्यतावच्छेदकतासंबंधे

नसंस्कारनाशत्वावच्छिन्नंप्रतिस्वीयशरीरादिनिष्ठप्रकारतानिरू
पितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानिरूपितभेदनिष्ठप्रका
रतानिरूपितविशेषणताविशेषीशेयसांसर्गिकविषयतानिरूपित
१ विशेष्यतावच्छेदकं[illegible]संबंधेनज्ञानत्वेनकारणत्वकल्पनयैवनिर्वाहे
णाऽहंशरीराद्यभिन्नइतिसंस्कारनाशेऽहंशरीरादिभिन्नइतिज्ञानस्यका
रणत्वांतराकल्पनात्। नचैवंमुक्तिहेतुत्वमपितस्यैवास्तुआवश्यकत्वा
दितिवाच्यं। तमेवसाधकश्रुत्येश्वरसाक्षात्कारस्यैवमुक्तिहेतुत्वप्र
तिपादनात्। अत्रवदंति। बृहदारण्यकश्रुतौमैत्रेयिकात्यायिन्योर्वि

त्तंविभज्यप्रव्रजिष्यंतंयाज्ञवल्क्यंप्रतियेनाहंनामृतास्यांकिमहंतेन
वित्तेनकुर्यांयदेवभगवानमृतत्वसाधनंवेदतदेवमेब्रूहीतिमैत्रेय्यापृ
ष्टेनवारेपत्युःकामायपतिःप्रियोभवत्यात्मनस्तुकामायपतिःप्रियो
भवतीत्यारभ्यनवारेसर्वस्यकामायसर्वंप्रियंभवत्तिआत्मनस्तु
१ कामायसर्वंप्रियंभवतीत्यंतेनपतिपुत्रवित्तादिसर्वपदार्थेषुद्वेषोदा
सिन्यादिदशायामपिस्वात्मनिप्रीतेस्तेभ्यआत्मोपकारेसत्येवते
षुप्रीतेरात्मोपकाराभावेतेषुद्वेषोदासिन्ययोर्दर्शनादन्वयव्यति
रेकाभ्यांप्रियत्वेनलोकतःसिद्धंस्वात्मनंजीवमुपक्रम्यआत्मावा

रेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यश्चेतिप्रतिपत्तिचतुष्कंवि
धायएतावदेवामृतत्वमित्यनेनस्वात्मसाक्षात्कारस्यमुक्तिहेतुत्वप्र
तिपादनाज्जीवात्मसाक्षात्कारएवमुक्तिहेतुःएतावदेवेत्यस्यस्वात्म
विषयकश्रवणादिचतुष्टयमेवेत्यर्थःअमृतत्वंअमृतत्वसाधनं।
रया साक्षात्परंप[illegible]यथायोगंमोक्षसाधनमितियावत्फलावत्स्यभा
वद्योतनायकारणेकार्योपचारा[illegible]द्दर्शनादावमृतत्वोक्तिः।अत्रदर्श
नस्यप्राधान्यबोधनायद्रष्टव्यइत्यस्यप्रथममुक्तिस्तस्यचनिदिध्या
सितव्यइत्यनंतरमन्वयः।श्रवणमननिदिध्यासनैरात्मासाक्षात्क

न२

र्तव्यइत्यर्थः।।पाठक्रमादर्थक्रमस्यबलवत्वात्।अतएवाग्निहोत्रं
जुहोतियवागूंपचतीत्यत्रपाठक्रमादग्निहोत्रहोमाद्द्रव्यांतरेण।
यवागूपाकस्ततपश्चाददृष्टार्थइतिप्राप्तेहोमस्यद्रव्यसापेक्षत्वेन
यवागूद्रव्यस्यचविनियोगसापेक्षत्वेनद्रव्यांतरेणहोमसाधनत्व
स्ययवागूपाकस्यादृष्टार्थत्वस्यचकल्पनापेक्षयायवागूद्रव्येणा
ग्निहोत्रहोमकल्पनायांलाघवात्तथैवकल्प्यतइतिसिद्धांतः।अ
तएवस्पष्टार्थो।स्मृतिःआगमेनानुमानेनध्यानाभ्यासबलेनच।त्रि
प्र१ धांकल्पयन्प्रज्ञांलभतेयोगमुत्तममिति।उत्तमोयोगआत्मत्वसाक्षा

त्कारः।केचित्तुश्रवणादीनामपिमुक्तिंप्रत्येवहेतुत्वंएकप्रकरणोपा
त्तानामुत्सर्गतःप्रधानफलान्वयात्।उक्तस्मृतावुत्तमयोगपदार्थश्चमु
क्तिरेवनचसाक्षात्काररूपैकसाधनावरुद्धेमोक्षरूपफलेनिराकांक्ष
तयासाधनांतराणांश्रवणादीनामन्वयोनसंभवतीतिवाच्यंश्रवणा
वरुद्धेसाक्षात्कारेत्वन्मतेपिमनननिदिध्यासनयोःसाधनत्वेनान्व
यानुपपत्तेः।किमन्यत्फलसाधनमित्याकांक्षायांश्वमन्मतेपिसं
भवादित्याहुः।चस्कृतस्कश्रवणंमननेनतन्निदिध्यासनेनतत्साक्षात्का
रेस्वंचमुक्तौहेतुः विधेःसाक्षाद्धेतुत्ववोधकतायाऔत्सर्गिकत्वेन ॥१

वाधकेकापोधोविधिरुत्सर्गः॥१

साक्षात्कारहेतुत्वापेक्षायांनिदिध्यासितव्यइतितद्धेत्वाकांक्षायांमंत
व्यइतितद्धेत्वाकांक्षायांचश्रोतव्यइत्युक्तेः।नचैकप्रकरणोपात्ताना
न्व मुत्सर्गतःप्रधानफलाँ[illegible]येनमोक्षएवश्रवणादीनांसाधनत्वेनान्व
यास्त्वितिवाच्यं।आत्मतत्वसाक्षात्कारस्यमुक्तिहेतुत्वप्रतिपादका
नि नामनेकेषांश्रुतिस्मृतिपुराणानांश्रौतात्मसाक्षात्काररूपैकसाधना
वरुद्धेमोक्षेनिराकांक्षतयाश्रवणादीनांसाधनत्वेनान्वयासंभवात्
वाधकसत्वेउत्सर्गत्यागस्यसर्वसिद्धत्वात्।अथनिदिध्यासनस्यैवा
त्मसाक्षात्कारहेतुत्वेमानाभावः।श्रवणस्यमननस्यैववातद्धेतुत्वमि
त्यस्यापिविनिगमकाभावेनस्फुवचत्वादितिचेन्न।निदिध्यासेस्यश्र न

वणमननहेतुत्वासंभवस्यैवविनिगमकत्वात्। ~~कामातुरकामिनी~~
कामातुरकामिनीसाक्षात्कारेनिरंतरभावनाया हेतुत्वस्यक्लृप्तत्वा
च्च। नचैवंकामातुरकामिनीसाक्षात्कारवत् आत्मसाक्षात्कारस्या
प्यप्रामाण्यप्रसंगइतिवाच्यं॥ विषयबाधाबाधयोरेवप्रामाण्याप्रा
माण्यप्रयोजकत्वेनतत्रविषयबाधेनाप्रामाण्येपिप्रकृतेविषया
बाधेनप्रामाण्योपपत्तेः। किंचनचक्षुषागृह्यतेनापिवाचानान्यैर्दे
वैस्तपसाकर्मणावा॥ ज्ञानप्रसादेनविशुद्धसत्वस्ततस्तुतंपश्यति
निष्कलंध्यायमानइत्याथर्वणिश्रुतिरपिनिदिध्यासनस्यैवात्मसा ॥१

क्षात्कारेहेतुत्वेप्रमाणं अत्रध्यायमानइतिहिनज्ञानंच ध्यायतेःपरस्मै
पदित्वात्। किंतुचानश्। सचताच्छील्यताच्छील्यवयोवचनशक्तिषु॥
चानशितिसूत्रात्। तेनचविजातीयप्रत्ययव्युदासेनसजातीयप्र
त्ययानुवृत्तिरूपध्यानप्रवाहरूपनिदिध्यासनस्यस्पष्टमेवलाभः
ततश्चध्यायमानपदोक्तनिदिध्यासनस्यैवतच्छब्देनपरामर्शाच्चिले
नतस्यैवसाक्षात्कारहेतुत्वंततइत्यनेनबोध्यते। नचपूर्वोक्तिप
ने रामर्शकतच्छब्देनकथंपश्चादुक्तनैदिध्यासनपरामर्शइतिवाच्यं॥
तीर्थेतदीयेगजसेतुबंधात्प्रतीपगामुत्तरतोस्यगंगां॥ अयत्न

नै बालव्यजनीबभूवुर्हंसानभोलंघनलोलपक्षाइत्यादौतत्पदेनगंगा पि.२
परामर्शदर्शनेनकेचित्पश्चादुक्तस्यांतत्पदेनपरामर्शदर्शनात्॥
आर्थिकेपौर्वापर्यस्यैवपरामर्शउपयोगेनशाब्दिकस्यतस्याकिं
चित्करत्वयाध्यायमानःसन्नूततःस्तंपश्यतीत्यन्वयेनतस्यैवपू
र्वोक्तत्वाच्चध्यायमानस्तंपश्यतीत्येतावतापिमलिनंतेवपुःस्ना
याइत्यादाविवसिद्धसाध्यसमभिव्याहारन्यायेननिदिध्यासनाम
का साक्षात्कारयोःकार्यकारणलाभस्यसुलभत्वाच्च।नचैवंतत्तइत्यस्यवै ॥१५
यर्थ्यंतत्तइत्यस्यतदनंतरमित्यर्थकत्वात्।यत्तुकेचिद्वेदांतिभि

रुक्तंद्वयंश्रुतिःश्रवणस्यैवदर्शनहेतुत्वेमानं।तत्रद्विकर्मणश्चपूर्व
मुक्तत्वात्तस्यैवश्रवणरूपविचारात्मकस्यतच्छब्देनपरामर्शः
सामान्यरूपेणपरामर्शेपियोग्यतावलाच्छ्रवणात्मकविशेष
स्यभानंपंचम्यादेशात्तसिलाहेतुत्वलाभः।नकर्मणेतिनिषेधस्तत्रश्र
वणान्यकर्मपरःज्ञानप्रसादपदेनमननाधीनचित्तैकाग्र्यस्य।वि
शुद्धसत्वपदेननिःकामकर्मानुष्ठानाधीनसत्वबुद्धेर्ध्यायमानप
देननिदिध्यासनस्योक्तत्वात्ततइतितच्छब्देनपरिशेषाच्छ्रवण
स्यैवपरामर्शौचित्येनश्रवणस्यैवसाक्षात्कारहेतुत्वस्यश्रुति

वे॰ तात्पर्यविषयत्वादिति। तन्न। पंचम्यास्तसिलित्यनेपंचम्यंतेभ्यः
धा। किमादिभ्यस्तसिल्विधानेपितत्तइत्यस्यहेतुपंचम्यादेशतसि
लंतत्वस्यैवसंदिग्धत्वात्। सर्वनाम्नांपूर्वोपस्थितपरामर्शकत्वे
नश्रवणस्यचपूर्वमनुपक्रांतत्तयासर्वनाम्नातच्छब्देनश्रवणपरा
मर्शासंभवाच्च। नचकर्मपदेनश्रवणमुपक्रांत [redacted]
मितिवाच्यं। द
र्शनाजनकानामिवकर्मणांतत्रोपादानात्। निषेधःश्रवणान्यकर्मप ॥१६
रइत्यस्यभवद्भिरेवोक्तत्वेनश्रवणान्यपरत्वेननिर्णीतकर्मपदस्य

सामान्यरूपेणापिश्रवणपरत्वानुपपत्त्याकर्मपदोक्तंश्रवणस्य पा
तच्छब्देनपरामर्शइतिवक्तुमशक्यत्वात्। सर्वथाशब्दतात्पर्यो
विषयस्यचप्रक्रांतत्वेमानाभावात्। एतेनद्रष्टव्यइत्यत्राव्यवहि
तपाठरूपसंनिधानात्प्रमाणस्यप्रमेयावगमंप्रतिकारणत्व
स्यचक्लृप्तत्वाच्चसाक्षात्काररूपफलसाधनत्वंश्रवणस्यैवि
धिनाबोध्यतेमनननिदिध्यासनयोस्तुश्रोतव्यइत्यनेनव्यव
धानार्हैर्निरूपेष्टसाधनत्वबोधनासंभवात्। प्रकरणेनश्र
वणांगता। निश्चयेनांगिनःश्रवणस्यांगत्वमेव। तदुक्तंविवरणे

96

स्प

वे श्रवणमंगिप्रमाणेप्रमेयावगमंप्रत्यव्यवधानात्।मनननिदिध्या
सनेतुफलोपकार्यंगेइति।अत्रप्रमेयावगमंप्रत्यव्यवधानादि
त्यस्यप्रमास्वरूपंप्रतिकारणत्वादित्यर्थः।अतएवात्रदर्शनोद्दे
शेनश्रवणादीनांविधानात्द्रष्टव्यइतिप्रथममुक्तमितिवेदांति
मपिपरास्तं।पाठक्रमादार्थक्रमस्यबलवत्त्वेनपाठरूपसंनि
धानस्याप्रयोजकत्वात्।शब्दस्यसाक्षात्कारकरणत्वाभावेन ||१७||
श्रवणरूपशब्दप्रमाणस्यात्मसाक्षात्कारात्मकप्रमेयावग
मंप्रतिकारणत्वस्याक्लृप्तत्वाच्च।नचदशमस्त्वमसीत्यादौश

ब्दादपिसाक्षात्कारोदयेनोक्तकारणत्वंक्लृप्तमेवेतिवाच्यं।तत्रापींद्रि
येणैवसाक्षात्कारोदयात्।अंधकारेअधस्य[illegible]चसाब्दबोधस्यै
वोदयेनतत्रचाक्षुषोत्पादेमानाभावात्।ननुतथापिप्रमाणव
स्तुपरतंत्रस्यज्ञानस्यकृत्यसाध्यतयाविधेयत्वासंभवेनद्रष्ट
व्यइत्यादिप्रतिपत्तिचतुष्कविधानानुपपत्तिः।नचपत्न्यवेक्षित
माज्यंभवतितस्मात्यत्रैपेच्चनित्यश्रुत्याज्यवेक्षणादिविधिव
दुपपत्तिरितिवाच्यं।तत्रानन्यगत्याआज्याऽवेक्षणादिजनकेंद्रि

वि यसन्निकर्षस्यैवविधेयत्वात्।नचैवंनविधौपरः शब्दार्थइति
ग। नियमभंगापत्तिरितिवाच्यं।गोपयोष्टिः सोमंमिश्रयेदित्यर्थके
गोभिः श्रीणीतमत्सरमित्यत्रगोपदस्यपयसिलक्षणांगीकारेण
तादृशनियमस्यैवासिद्धेः।नचात्रापिज्ञानानुकूलव्यापारेलक्षणे
प तिवाच्यं।तस्यनिदिध्यासनां[illegible]कस्यविधानेविधिपैनरु[illegible]
क्त्यापत्तेः व्यापारांतरविधानेचतस्यैवमोक्षहेतुत्वप्रसंगात्सा ग
क्षात्कारस्यमोक्षहेतुत्वासिद्धिप्रसंगादितिचेन्न।साक्षात्कृ ।।१८

वि तिसाध्यत्वस्यविध्यर्थत्वेज्योतिष्टोमेनस्वर्गकामोयजेतेत्या
दावपिविध्यर्थबाधापत्तिः यागादेरिच्छाघात्मकत्वेनज्ञानवत्कृ
त्यसाध्यत्वादितिसाक्षात्परंपरासाधारणकृतिसाध्यत्वस्यैव
विध्यर्थत्वमुपेयं।तस्यचज्ञानेपिसत्वेनानुपपत्यभावात्।य
द्वाश्येनेनाभिचरन्यजेतेत्यादौयथा।ऽयोग्यतयाबलवदनिष्टा
ननुबंधित्वांशंविहायैवविध्यर्थान्वयस्तथाप्रकृतेपिअयो
ग्यतयाकृतिसाध्यत्वांशंविहायैवेतरांशान्वयेतुनकाप्य
नुपपत्तिः कृतिसाध्यस्यैवविधेयत्वमितिनियमेमानाभावा

१८

तयुज्यतेचेत्तत् ।अन्यथाआज्यावेक्षणादिविधावप्य[illegible]व
गत्तेः ।नचैवोक्तैवगतिरितिवाच्यं ।साक्षात्कृतिसाध्यत्वस्य
तज्जनकेंद्रियसंनिकर्षेप्यभावात् ।अनिच्छतोपिदुर्गंधज्ञा
नवदिच्छतोपिअनिष्टेंद्रियसंनिकर्षस्यापिदर्शनेनद्वयोः
साम्यात् ।तज्जनकसन्निकर्षेइंद्रियनिष्टक्रियाद्वारापरं
परयाकृतिसाध्यत्वोपपादनेकृतिसाध्यत्वंविहायेंत
रांशस्यैवान्वयोपगमेवाआज्यावेक्षणा[illegible]विनैवमदुक्त
प्रकारेणैवविनिर्वाहात् ।किंचतत्रतज्जनकसन्निकर्षस्य

एवेवतत्संभवेनलक्षणं २

विधेयत्वेभिन्नविषयकानुमित्यासामग्र्यादिकालेआज्या
वेक्षणानुत्पादेपितज्जनकेंद्रियसन्निकर्षसत्वेनपत्न्यवेक्षि
तत्तयाआज्यंभतीतिविध्यर्थसिद्धिप्रसंगः ।नचेष्टापत्तिःअं
धकारेपितदनुष्ठानापत्तावाचारविरोधात् ।अतएवविवाहे
ध्रुवदर्शनविधौसायदिनंपश्येत्पश्यामीत्येवब्रूयादित्यत्रसं
गतिः ।अन्यथातत्रापिध्रुवचक्षुःसंयोगमात्रस्यविधेयत्वेध्रु
वचाक्षुषाभावेपितच्चक्षुःसंयोगस्यजातत्वाद्विध्यर्थनिष्पत्तौ
यदिनपश्येदित्यादेरसंगतत्वापत्तेःपूर्वविधेयव्यतिरेकस्यैव

१०वि० तदर्थत्वात्। एतेनमनोब्रह्मेत्युपासीतवाचंधेनुमुपासीतेत्या
२०।। दावुपासनंमानसवृत्तिविशेषात्मकक्रियारूपंनत्वाहार्य
मानसज्ञानरूपंतस्यकृत्यसाध्यतयाविधेयत्वासंभवा
दितिवदंतिमतमपिनिरस्तं। तत्राप्युक्तरीत्याज्ञानस्यवि
धेयत्वोपपत्तेरित्यलंश्रुत्यर्थविचारेण। तस्मादुक्तबृहदार
ण्यकश्रुतिबलात्सिद्धंजीवात्मसाक्षात्कारस्यमुक्तिहेतुत्वं ।।२०
अतएवात्मानंचेद्विजानीयादयमस्मीतिपूरुषः। किमिच्छ
न्कस्यकामायशरीरमनुसंज्वरेत्इत्यादिश्रुत्येतेरपिस्वात्म

प्र१

साक्षात्कारस्य[redacted]त्याद्यभावद्वारामुक्तिहेतुत्वकल्पनंसंगच्छ
यु२ ते।[redacted]ज्यतेचैतत्। मिथ्याज्ञानजन्यवासनानाशानुरोधेनजी
वतत्वज्ञानस्यावश्यकत्तयातद्वारातस्यैवमुक्तिहेतुत्वकल्प
नायाउचितत्वात्। तर्हिईश्वरात्मसाक्षात्कारस्यमुक्तिहेतुत्व
बोधकश्रुतेःकागतिरितिचेत्लक्षणयाजीवात्मसाक्षात्कार
स्यमुक्तिहेतुतापरत्वं। नचविनिगमनाविरहः उपदर्शितत्त
मेवेत्या[redacted]दिश्रुत्यनुरोधेनेश्वरसाक्षात्कारएवमुक्तिहेतुःआ
त्मावारेद्रष्टव्यइत्यादिश्रुतेर्लक्षणा। येश्वरसाक्षात्कारस्यमुक्ति

२९

ंवि हेतुत्तापरत्वमितिवक्तुंशक्यत्वादिवाच्यं। ईश्वरसाक्षात्कारास्सं
भवस्यैवविनिगमकत्वात् ॥ तदसंभवस्तुमनःसंयोगादिरू
पसन्निकर्षवलादेकपुरुषस्यपुरुषांतरीयप्रत्यक्षवारणाया
॥।(त्मवृत्तिविषयतासंबंधेनतत्तत्पुरुषीयात्मप्रत्यक्षंप्रतितत्तत्पु
रुषीयात्मनांतादात्म्यसंबंधेनहेतुत्तयेश्वरात्मनितत्तत्तादात्म्ये
नांतादात्म्येनाभावादिति। नचेदं। सन्निकर्षविधयामनःसंयो ॥२१।
त गस्यविजातीयसंयोगत्वेनहेतुत्वेयैवपुरुषांतरात्मनिष्ठान्यदी
यमनःसंयोगेवैजात्यानभ्युपगमेनएकपुरुषस्यपुरुषांतरा

त्मप्रत्यक्षवारणेतत्तदात्मनामहेतुत्वेनफलोन्नेयवैजात्यस्ये
श्वरात्मनिष्ठास्मदीयमनःसंयोगेसत्वेनेश्वरात्मसाक्षात्कारसं
भवात्। अथेश्वरात्मसाक्षात्कारसंभवेपितस्यैवमुक्तिजनकत्वे र
प्रमाणाभावः पूर्वोपदर्शितविनिगमनाविरहेणजीवात्मसाक्षा
त्कारस्यैवमुक्तिहेतुत्वमित्यस्यापिसुवचत्वादितिचेन्न। लाघ
वस्यैवविनिगमकत्वात्। तथाहि। जीवात्मसाक्षात्कारस्यमु
क्तिहेतुत्वेतमेवेतिश्रुतिवत्परेणनाकंनिहितंगुहायांविभ्रा
जतेयद्यतयोविशंति। ब्रह्मविद्ब्रह्मैवभवति। ब्रह्मविदाप्नोति

०वि
२

परं।ततःपरंब्रह्मपरंबृहंतंयथानिकायंसर्वभूतेषुगूढंविश्व
स्यैकंपरिवेष्टितारमीशंतंज्ञात्वाऽमृताभवंतियस्मात्परंनाप
रमस्तिकिंचिद्यस्मान्नाणीयोनज्यायोस्तिकश्चिद्वृक्षइवस्त
ब्धोदिवितिष्ठत्येकःतेनेदंपूर्णंपुरुषेणसर्वंततोयदुत्तरंतद्रु
रूपमनामयंयएतद्विदुरमृतास्तेभवंति।अथेतरेदुःखमेवा
पियंति।अथनित्योनिष्कलोनिराख्यातोनिर्विकल्पोनिरं
जनःशुद्धोद्वितीयोनद्वितीयोस्तिकश्चिद्यएवंवेद।रुद्रंस
सारथिंकृत्वामनःप्रग्रणवान्नरःप्रयातिपरमंपारंविष्णवाख्यं

११२

पदमव्ययं।एवंविदित्वापरमात्मरूपंगुहाशयंनिष्कलमद्वि
तीयं।समस्तसाक्षींसदसद्विहीनंप्रयातिशुद्धंपरमात्मरू
पं।यदाचर्मवदाकाशंवेष्टयिष्यंतिमानवाःतदाशिवम
विज्ञायदुःखस्यांतोभविष्यति।इत्याद्यनंतश्रुतीनांलाक्ष
णिकत्वेगौरवं।ईश्वर[illegible]साक्षात्कारस्यमुक्तिहेतुत्वेआत्मावा
रेइत्यादिकतिपयश्रुतीनांलाक्षणिकत्वेनलाघवात्।आत्मा
वारेइत्यत्रसामान्यतआत्मशब्दोपादानात्।अथनित्योनि
ष्कलइत्यादिश्रुतेःसैकवाक्यतयालक्षणांविनापिईश्वरपर

गां

१०वि त्वेनातिलाघवाच्च। नचास्याइश्वरपरत्वेपूर्वेणनवारेइत्यादिना
२३ प्रियत्वादिरूपजीवधर्मकथनविरोधइतिवाच्यंभवन्मतेजीवा
त्मपरत्वेऽपितदुत्तरमेतस्यैवमहाभूतस्यनिश्वसितमेतद्यदृ
ग्वेदोयजुर्वेदोऽथर्वणइत्यादीश्वरधर्मकथनविरोधात्। तस्य
जीविश्वराभेदभावनामुक्तिप्रयोजिकेत्यत्रसरत्वांगीकारेचम
था यापितथात्ववक्तुंशक्यत्वात्। तमेवेतिश्रुतेरयमर्थः। आत्मान्या २२
विषयकमात्मविषयकज्ञानंमोक्षजनकं। नचात्मज्ञानेमनः
संयो[illegible]कसमवायरूपकारणबलादात्मत्वस्यापिज्ञानेवा
धकाभावइतिवाच्यं। आत्मान्यविषयकज्ञानेनिदिध्यासन

स्यागत्याप्रतिबंधकत्वोपगमात्। नचैवमपितादात्म्यसंबंधे
नात्मप्रकारकात्मविशेष्यज्ञानस्यहेतुत्वमायातंतत्रात्मान्यवि
षयकत्वस्यसत्वादितिवाच्यं। आत्मनःस्वरूपतःप्रकारत्वासं
भवेनतस्यात्मान्यविषयकत्वात्। सप्रकारकात्मज्ञानत्वस्ये
ववाप्रतिबध्यतावच्छेदकत्वात्। नचतमेवेत्येवकारस्यविदित्वे
त्यनंतरंयोजनेनात्मज्ञानमेवमोक्षजनकंनतुकर्मेत्यर्थः। एवंचा
त्मत्वप्रकारकात्मविशेष्यकज्ञानमेवमोक्षजनकंतथासत्यु
क्तप्रतिबध्यप्रतिबंधकभावाकल्पनेनलाघवमपीतिवाच्यं।
नान्यःपंथाविद्यतेइत्यग्रिमेणपौनरुक्त्यापत्तेः। एवंचात्मनि

वि॰ विकल्पकमेवमोक्षजनकंव्यक्तिमत्रविषयकस्यापिनिर्विकि॰
ल्पबाधकाभावात्।अन्यथात्तस्यसविकल्पकनिर्विकल्पको
४॥ भयबहिर्भावापत्तेरितिप्रांचः।नव्यास्तुघटत्वेनघटंजानाती
त्यादौविशेष्यत्वस्यद्वितीयार्थत्वेनक्लृप्ततयात्मान्याविशेषा
कमात्मविशेष्यकंज्ञानंमोक्षजनकमित्यर्थलाभेनात्मत्वप्रका
रकात्मविशेष्यकज्ञानस्यमोक्षजनकत्वंदुर्वारं।तएवात्मा अ
द्रष्टव्यइत्यादिनोप्यात्मत्वविशिष्टस्यज्ञातव्यत्वलाभः।एवंच ॥२४
सप्रकारकात्मज्ञानमात्रस्यमोक्षजनकत्वेपरमात्मनो
असाधारणधर्मेणनिश्चयोप्रामाण्यशंकाकलंकप्रे

न्यःप्रारब्धातिरिक्तविद्यमाननिखिलपापनाशकोमोक्षजन
कःअन्यथापरमात्मगतधर्माणांवेदनदसाधारधर्मकथ
नवैय्यर्थ्यापत्तेरितिफलितमित्याहुः।परेणनाकमितिश्रुतौ
परेणेतितृतीयार्थेवैशिष्ट्यंसावप्रधानोनिर्देशः तथाचपर
त्वविशिष्टमुत्कृष्टमितियावत्।नाकंदुःखरहितंगुहाशयमि
त्यनेनगूढत्वंसूचितं।विभ्राजतेप्रकाशतेयत्यदाएतदनं
तरंतदेत्यध्याहारः।यतयःयत्नवंतोमुमुक्षवःविशंतिमोक्षप
दवीमितिशेषः॥ब्रह्मविदित्यत्रब्रह्मशब्दःईश्वरपरःएवमग्रेपि

स

२५

स

०वि० अस्यैव न भवतीत्यत्र एवकारः इवार्थे असादृश्यं च दुःखाभाववत्त्वे
न मोक्षदशायां स्फुटं। परं मोक्षे ततः परं श्रवणाद्युत्तरं ब्रह्मज्ञा
२५॥ त्वेति संबंधः परमुत्कृष्टं परत्वे हेतुमाह। बृहंतमिति। यथा निका
यं यादृशं रूपमीश्वरस्य तादृशस्वरूपविशिष्टं ज्ञात्वेत्यर्थः। ज्ञा
नादौ लभ्यमाह सर्वभूतेषु गूढमिति परिवेष्टितारं प्रेरकं यस्मा
त्परमित्यादि द्वितीयं तमेकाकृतिः। अपरमात्मभिन्नं किंचिद्वस्तु
यस्माज्जीवात्मनः परं पूर्वकालवृत्ति नास्ति आत्मनो नित्यत्वेन
पूर्वकालाप्रसिद्धेः एतेन प्रागभावाप्रतियोगित्वलाभः। यस्मा

त्किंचिदणीयो नास्ति दुर्ज्ञेयत्वात्। न चाहमिति प्रत्ययवेद्यत्वे क
थं दुर्ज्ञेयत्वमिति वाच्यं। अहमिति प्रत्ययस्य शरीरावच्छिन्नात्म
विषयकत्वेन केवलात्मविषयकत्वासिद्धेः न च ज्यायोस्ति स
र्वभोक्तृत्वात् ध्वंसाप्रतियोगित्वलाभायाह वृक्ष इवेति दिवि
स्तब्धो वृक्ष इवेत्यनेनानपलनीयत्वं सूचितं। एकस्तिष्ठतीत्यने
न जन्यद्रव्यासंयुक्तस्यावस्थालाभात् अर्थात् ध्वंसप्रतियोगित्ववा
ने रणं विभुत्वलाभार्थमाह तेनेदमिति एवं जीवात्मस्वरूपमुक्त्वा प्र
कृतमाह तत इति। ततः जीवात् यत् उत्तरं श्रेष्ठमीश्वरस्वरू
पं ईश्वरस्य जीवापेक्षयोत्कर्षे हेतुमाह। तदरूपमनामयमि

।०वि०
२६।।

ति।नविद्यतेरूपोरूपणंसर्वदासाक्षात्कारोयस्य॰सामान्यशा
स्त्रस्यविशेषपरत्वादस्मदादीनांजीवस्यैवेश्वरस्यसर्वदाप्रत्य
क्षाभावादुपपन्नमेतत्।अनामयंदुःखरहितं॰अथेतिनिष्क ६
लोनिरवयवः॰निरख्यातः॰प्रतिपाद्यितुमशक्यः॰अचिंत्यैश्वर्यात्।
निर्विकल्पः॰विवादरहितः॰सर्वसंमतत्वात्।निरंजनःनिर्दोषः॰अत
एवशुद्धः।अद्वितीयइत्यस्यविवरणंनद्वितीयोस्तिकश्चिदीशेनि
ति सारथिंउक्तवेदनरूपंएवमिश्वरतोसदसद्विहीनमिति॰सञ्जो
शशशृंगादिभ्योविलक्षणं।यदाचर्मवदित्यस्याकाशंवेष्टनंय वे
थाअसंभावितंतथाईश्वरात्मज्ञानंविनामोक्षोसंभावित

इत्यर्थः।स्पष्टमन्यत्।अस्त्ववाश्रुतीनांन्यूनाधिकभावस्य
दुर्विज्ञेयत्वंतथाविनिगमकाभावेनोभयोरपिमुक्तिहेतुत्वंत
थापिजीवात्मसाक्षात्कारएवमुक्तिहेतुरित्यसंगतमेवश्रु
तएवद्वेब्रह्मणीवेदितव्येपरंचापरमेवेत्यादिश्रुतिः॰स्वर्गाप
वर्गयोर्द्वारमामनंतिमनीषिणः।यदुपास्तिमसावत्रपरमात्मा
निरूप्यते।न्यायचर्चेयमीशस्यमननव्यपदेशभागित्याद्या
चार्यग्रंथेपिसंगच्छंते।बौद्धधिक्काराख्येनदीधिति
काराणांजीवात्मसाक्षात्कारस्यमुक्तिहेतुत्वसाधनप्रत्य

वि० त्मकजीवात्मसाक्षात्कारस्यापिमुक्तिहेतुत्वपरः तथैवतात्प
र्यात्। भवतुवाजीवात्मसाक्षात्कारस्यैवमुक्तिहेतुत्वं तथापिप्र
७। कृतेनक्षितिः मनःसंयोगकार्यतावच्छेदककोटिप्रविष्टत
याजीवात्मनिसिद्धया आत्मत्वजातेः श्रौतात्मव्यवहारब
लेनईश्वरसंबंधकल्पनादात्मपदशक्यतावच्छेदकत्वकल्प
नाच्चेश्वरात्मसाधारणात्मत्वजातिर्दुरदुष्टत्वात्। एतेनेश्वरा
त्मसाक्षात्कारस्यमुक्तिहेतुत्वेनतस्यमनःसंयोगकार्यताव
च्छेदकात्मत्वेपिनक्षतिः। योगिनस्तंप्रपश्यंतिभगवंत

मधोक्षजस्यैमित्यादिस्मृतिवलाद्योगजधर्मप्रत्यासत्तिज
न्येश्वरात्मसाक्षात्कारस्यैवमुक्तिहेतुत्वात्तथाचनोक्तयुक्त्या
ईश्वरसाधारणात्मत्वजातिसिद्धिरित्यपिपरास्तं। केचि
त्तुतादात्म्यसंबंधेनात्मत्वेनैवानुमितिकरणत्तयाजीवेन्या
त्मत्वजातेः सिद्धावुक्तरीत्या ईश्वरात्मसाधारण्यमित्याहुः।
अन्येतुज्ञानाद्यभावकालीनमनःसंयोगदशायामात्म
नोमानसवारणायात्ममानसंप्रतिज्ञानादीनांहेतुत्वंवाच्य
मितितत्कार्यतावच्छेदककोटिप्रविष्टतयाआत्मत्वजाति

०वि
२८॥

सिद्धिरित्याहुः। वस्तुतस्तु अन्वयव्यतिरेकाभ्यां कार्य
त्वावच्छिन्नं प्रति कर्तृत्वेन कारणत्वं वाच्यं। कर्तृत्वं च न
कृतिमत्त्वं कारणतावच्छेदकाननुगमात्। न वा स्वाश्रय
समवायित्वसंबंधेन कृतित्वं गौरवात्। किंत्वात्मत्वमेव।
क्षित्यंकुरादिकं कर्तृजन्यं कार्यत्वाद् घटवदित्यनुमानेपि क
र्तृजन्यत्वं न स्वोपादानगोचरापरोक्षज्ञानचिकीर्षासमा
नाधिकरणकृतिजन्यत्वं किंत्वात्मजन्यत्वमेव तावतैव क्षि
त्यंकुरादीनां कुलालाद्यात्मजन्यत्वासंभवेनेश्वरसिद्धौ। नचैव

२८।

०वि०

मीश्वरे ज्ञानेच्छाकृतीनामसिध्यापत्तिरिति वाच्यं। उक्तानुमा
नेनेश्वरसिध्यनंतरं ईश्वरकर्तृकत्वेन श्रुतेः प्रामाण्यसिद्धौ
श्रुतित एव तत्सिद्धेः॥ न च तथापि कुविंदादिभ्यो घटाद्याप
त्तिवारणाय घटत्वाद्यवच्छिन्नं प्रति कुलालत्वादिना विशिष्य
हेतुत्वावश्यकत्वे उक्तसामान्यहेतुतायां मानाभाव इति वा
च्यं। कार्यत्वावच्छिन्नाभावे कुलालत्वाद्यवच्छिन्नाभावकूट
स्य॥ कूटस्य प्रयोजकत्वापेक्षया आत्मत्वाद्यवच्छिन्नाभा
वस्य प्रयोजकत्वे लाघवेन तत्सिद्धेः॥ एवं च जीवेश्वरसाधा

२९

रणात्आत्मत्वजातिर्विकलैव। एतेनात्ममानसप्रत्यक्षे
संनिकर्षविधयामनःसंयोगस्यहेतुत्वेमानाभावः।प्रत्य
क्षविषयत्वस्यसन्निकर्षजन्यत्वानियतत्वात्।आत्मनिम
नःसंयोगात्मकविलक्षणसन्निकर्षशून्यकालेजन्यज्ञानसा
मान्यहेतुभूतात्ममनःसंयोगविरहेणैवतद्विषयकमानसस्या
पिवारणसंभवात्॥ नचैकेनपुंसान्यात्ममात्रस्यग्रहणवा
रणायात्मवृत्तिविषयतासंबंधेनतत्पुरुषीयमानसत्वाव

च्छिन्नंप्रतितत्पुरुषीयमनःप्रतियोगिकविजातीयसंयोग
त्वेनहेतुत्वकल्पनमावश्यकमितिवाच्यं।आत्मवृत्तिविष
यतासंबंधेनतत्पुरुषीयमानसत्वावच्छिन्नंप्रतितत्पुरुषी
यमनःप्रतियोगिकविजातीयसंयोगत्वरूपगुरुधर्मेणस
मवायप्रत्यासत्त्याहेतुताकल्पनापेक्षयासमवायसंबंधेन
तत्तदात्ममानसत्वावच्छिन्नंप्रतितादात्म्यसंबंधेन~~तत्तदात्म~~
~~ना~~तत्तदात्मनातत्तद्व्यक्तित्वेनहेतुत्वकल्पनस्यैवोचितत्वात्
।एवंचमनःसयोगकार्यतावच्छेदकतयाआत्मत्वजाति

गवि सिद्धिरपीतिकस्यचिल्लपितमपिप्रत्युक्तं।तथाप्युक्त
२७। रीत्याजीवेश्वरसाधारणात्मत्वजातिसिद्धेर्गीर्वाणगुरुणा
पिनिराकर्तुमशक्यत्वात्।यत्तुअनुमितिपरामर्शयोःसम
वायघटितसामानाधिकरण्यप्रत्यासत्याकार्यकारणभावक
ल्पेपक्षतावच्छेदकभेदेनानंतकार्यकारणभावकल्पनप्रसं
गेनगौरवमितिधर्मितावच्छेदकनिष्ठप्रत्यासत्या।कार्यकार
णभावोवाच्यःनचैतत्कल्पेएकपुरुषीयपरामर्शादशायाम
न्यपुरुषस्यानुमितिवारणायपुरुषभेदेनकार्यकारणभाव

कल्पनप्रसंगेनगौरवमितिवाच्यं।पुरुषापेक्षयाविषयणाम
धिक्येनपूर्वकल्पएवगौरवात्।एवंचात्मभिन्नेसमवायेनानु
मितिवारणायसमवायेनानुमितिंप्रतितादात्म्येनात्मत्वेन
कार्यकारणभावोऽवश्यंवाच्यइतिआत्मत्वजातिसिद्धिरिति।
तदसत्।आहार्यत्वस्याननुगतस्यदुर्वचत्तयाआहार्यपरा
मर्शादनुमितिवारणायाहार्यज्ञानानांतत्तद्व्यक्तित्वावच्छिन्न
प्रतियोगिताकभेदकूटस्यैवपरामर्शनिष्ठानुमितिकारण
तावच्छेदककोटौनिवेशनीयतयाधर्मितावच्छेदकनिष्ठप्रत्यास
त्तिकल्पेसर्वेषांतेषामेकत्रनिवेशेनविशेष्यविशेषणभावेविगम नि

वि
।।।

नाविरहेणानंतकार्यकारणभावापत्तिरितिगौरवं।पक्षतावच्छे
दकभेदेनसमवायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुत्वे
चेत्तत्पक्षतावच्छेदकावच्छिन्नविशेष्यकाहार्यज्ञानव्यक्तिभेदानां
तत्पक्षतावच्छेदकावच्छिन्नविशेष्यकपरामर्शनिष्ठानुमितिका
रणतावच्छेदककोटौनिवेशनेसर्वेषांतेषामेकत्रानिवेशनेननो
कारीत्यागौरवमितिलाघवेनसमवायघटितसामानाधिक
रण्यप्रत्यासंकल्पस्यैवसम्यक्त्वं।आत्मभिन्ने विजातीयमनः
संयोगरूपसमवायेनज्ञानसामान्योत्पादकसामग्र्यभावा
यदपिस्मृतिंप्रतिपूर्वानुभवस्यहेतुत्वमितिनिर्विवादंतच्चघट

त्त

त्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यतासं
बंधेनचैत्रीयस्मृतित्वावच्छिन्नंप्रतितेनसंबंधेनज्ञानत्वेनेत्या
दिरीत्याविशेष्यनिष्ठप्रत्यासत्त्यैववाच्यंनतुसमवायेनभूत
लत्वविशिष्टतत्तद्भूतलविशेष्यकघटत्वावच्छिन्नप्रकारकस्मृ
तिंप्रतिसमवायेनैतादृशज्ञानत्वेनेत्यादिरीत्यासमवाय
घटितसामानाधिकरण्यप्रत्यासत्त्यातथासतिविशेष्यभेदे
नानंतकार्यकारणभावापत्तेःअत्राप्युक्तरीत्याविशेष्यनिष्ठप्र
त्यासत्तिकल्पेगौरवमितितुनाशंकनीयं।आहार्यज्ञानादपि
स्मृत्युदयेनाहार्यत्वस्यस्मृतिजनकतायामप्रवेशात्।नचै

ा०वि०
२॥

वंदीधितिकारस्याथविशिष्टस्मरणेतिव्याप्तिरित्यादिना
नुमितिलक्षणस्यविशिष्टस्मरणेऽतिव्याप्त्याशंकनमसं
गतंअनुमितिजनकतायामनाहार्यत्वस्यप्रवेशेनस्मृतिजन
कतायांतस्याऽप्रवेशेनस्मृत्यनुमितिकारणतावच्छेदकयोर्भे
दादितिवाच्यं।तत्संगमप्रकारस्यान्यत्रप्रपंचितत्वात्।एवंचा
त्मभिन्नेसमवायस्समवायसंबंधेनस्मृतेरापत्तिवारणायस
मवायेनजन्यज्ञानत्वावच्छिन्नंप्रतितादात्म्येनात्मत्वेनहेतुत्व
कल्पनमावश्यकमितिआत्मत्वजातिसिद्धिः नचसुषुप्तिका
लेज्ञानोत्पत्ति[illegible]वारणायजन्यज्ञानमात्रेआत्ममनःसंयो

३२

गस्यविजातीयसंयोगत्वेनहेतुत्वकल्पनस्यावश्यकतयातेनैवोक्तापत्ति
वारणसंभवेनोक्तहेतुत्वकल्पनेमानाभावा[illegible]इतिवाच्यं।विजातीयचक्षुः
संयोगादिविजातीयपरामर्शादिरूपविशेषसामग्र्यभावेनैवसुषुप्तिका
लेज्ञानसामान्योत्पत्तिवारणसंभवेनात्ममनोयोगस्यविजातीयसंयोग
त्वेनहेतुत्वकल्पनएवमानाभावात्।नचभावकार्यस्यासमवायिकारणज
न्यत्वनियमेनजन्यज्ञानमात्रेआत्ममनःसंयोगस्यहेतुत्वकल्पनमावश्यक
मितिवाच्यं।तादृशनियमेमानाभावादिति।तदपिन।सुषुप्तिकालीनज्ञान
सामान्याभावेविशेषसामग्र्यभावकूटस्यप्रयोजकत्वकल्पनापेक्षयावि
जातीयसंयोगाभावस्यप्रयोजकत्वेलाघवेनविजातीयसंयोगत्वेनहेतु
त्वकल्पनस्यैवोचितत्वात्।तस्मात्पूर्वोक्तरीत्यैवात्मत्वजातिसिद्धिरित्यल
मतिशयविस्तरेण।ईदृशःसाधारणात्मत्वजातिवादोयमद्भुतः॥महादेवेन
विदुषाविदुषांतुष्ट्यैकृतः॥१॥स्वीयंयोगंग्रंथमन्यस्यतरीयंचान्यकर्तृकं॥वाक्कि
शौप्रांतयोर्नागृह्णातुभोजारज्ञातकौ॥२॥
इतिश्रीमत्पदवाक्यप्रमाणाभिज्ञपुण्यस्तंभकरोपनामकश्रीमुकुंदपंडितात्मजमहा
देवविरचितात्मत्वजातिविचारः समाप्तः॥

३३

33

```
[OrderDescription]
,CREATED=23.10.20 16:52
,TRANSFERRED=2020/10/23 at 16:57:20
,PAGES=33
,TYPE=STD
,NAME=S0004515
,Book Name=
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
```

FILE32=00000032.TIF
,FILE33=00000033.TIF
,